# Shri Dhararchanavidhi

# श्रीधरार्चनविधिः

## Document Information

Text title : Shri Dhararchanavidhi

File name : dharArchanavidhiH.itx

Category : misc, garuDapurANa, pUjA

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : garuDapurANa | pUrvakhaNDa |adhyAya 30/13-16||

Latest update : October 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2024

*sanskritdocuments.org*

# श्रीधरार्चनविधिः

विष्ण्वर्चनविधिः

सूत उवाच ।

विस्तरेण प्रवक्ष्यामि श्रीधरस्यार्चनं शुभम् ।
परिवारश्च सर्वेषां समो ज्ञेयो हि पण्डितैः ॥ १॥

ॐ श्रां हृदयाय नमः ।
ॐ श्रीं शिरसे स्वाहा ।
ॐ श्रूं शिखायै वषट् ।
ॐ श्रैं कवचाय हुम् ।
ॐ श्रौं नेत्रत्रयाय वौषट् ।
ॐ श्रः अस्त्राय फट् इति ॥ २॥

दर्शयेदात्मनो मुद्रां शङ्खचक्रगदादिकाम् ।
ध्यात्वाऽऽत्मानं श्रीधराख्यं शङ्खचक्रगदाधरम् ॥ ३॥

ततस्तं पूजयेद्देवं मण्डले स्वस्तिकादिके ।
आसनं पूजयेदादौ देवदेवस्य शार्ङ्गिणः ।
एभिर्मन्त्रैर्महादेव तान्मत्राञ्छृणु शङ्कर ॥ ४॥

ॐ श्रीधरासनदेवताः आगच्छत ।
ॐ समस्तपरिवारायाच्युतासनाय नमः ॥ ५॥

ॐ धात्रे नमः ।
ॐ विधात्रे नमः ।
ॐ गङ्गायै नमः ।
ॐ यमुनायै नमः ।
ॐ आधारशक्त्यै नमः ।
ॐ कूर्माय नमः ।
ॐ अनन्ताय नमः ।

ॐ पृथिव्यै नमः ।
ॐ धर्म्माय नमः ।
ॐ ज्ञानाय नमः ।
ॐ वैराग्याय नमः ।
ॐ ऐश्वर्याय नमः ।
ॐ अधर्माय नमः ।
ॐ अज्ञानाय नमः ।
ॐ अवैराग्याय नमः ।
ॐ अनैश्वर्याय नमः ।
ॐ कन्दाय नमः ।
ॐ नालाय नमः ।
ॐ पद्माय नमः ।
ॐ विमलायै नमः ।
ॐ उत्कर्षिण्यै नमः ।
ॐ ज्ञानायै नमः ।
ॐ क्रियायै नमः ।
ॐ योगायै नमः ।
ॐ प्रह्व्यै नमः ।
ॐ सत्यायै नमः ।
ॐ ईशानायै नमः ।
ॐ अनुग्रहायै नमः ॥ ६॥

अर्चयित्वा समं रुद्र हरिमावाह्य संयजेत् ।
मन्त्रैरेभिर्महाप्राज्ञः सर्वपापप्रणाशनैः ॥ ७॥

ॐ ह्रीं श्रीधराय त्रैलोक्यमोहनाय विष्णवे नमः आगच्छ ॥ ८॥

ॐ श्रियै नमः ।
ॐ श्रां हृदयाय नमः ।
ॐ श्रीं शिरसे नमः ।
ॐ श्रूं शिखायै नमः ।
ॐ श्रैं कवचाय नमः ।
ॐ श्रौं नेत्रत्रयाय नमः ।
ॐ श्रः अस्त्राय नमः ।

ॐ शङ्खाय नमः ।

ॐ पद्माय नमः ।

ॐ चक्राय नमः ।

ॐ गदायै नमः ।

ॐ श्रीवत्साय नमः ।

ॐ कौस्तुभ्यै नमः ।

ॐ वनमालायै नमः ।

ॐ पीताम्बराय नमः ।

ॐ ब्रह्मणे नमः ।

ॐ नारदाय नमः ।

ॐ गुरुभ्यो नमः ।

ॐ इन्द्राय नमः ।

ॐ अग्नये नमः ।

ॐ यमाय नमः ।

ॐ निर्ऋतये नमः ।

ॐ वरुणाय नमः ।

ॐ वायवे नमः ।

ॐ सोमाय नमः ।

ॐ ईशानाय नमः ।

ॐ अनन्ताय नमः ।

ॐ ब्रह्मणे नमः ।

ॐ सत्त्वाय नमः ।

ॐ रजसे नमः ।

ॐ तमसे नमः ।

ॐ विष्वक्सेनाय नमः ॥ ९॥

अभिषेकं तथा वस्त्रं ततो यज्ञोपवीतकम् ।
गन्धं पुष्पं तथा धूपं दीपमन्नं प्रदक्षिणम् ॥ १०॥

दद्यादेभिर्महामन्त्रैः समर्प्यार्थं जपेन्मनुम् ।
शतमष्टोत्तरं चापि जप्त्वा ह्यथ समर्पयेत् ॥ ११॥

ततो मुहूर्त्तमेकन्तु ध्यायेद्देवं हृदि स्थितम् ।
शुद्धस्फटिकसङ्काशं सूर्कोटिसमप्रभम् ॥ १२॥

प्रसन्नवदनं सौम्यं स्फुरन्मकरकुण्डलम् ।
किरीटिनमुदाराङ्गं वनमालासमन्वितम् ॥ १३॥

परब्रह्मस्वरूपं च श्रीधरं चिन्तयेत्सुधीः ।
अनेन चैव स्तोत्रेण स्तुवीत परमेश्वरम् ॥ १४॥

श्रीनिवासाय देवाय नमः श्रीपतये नमः ।
श्रीधराय सशार्ङ्गाय श्रीप्रदाय नमो नमः ॥ १५॥

श्रीवल्लभाय शान्ताय श्रीमते च नमो नमः ।
श्रीपर्वतनिवासाय नमः श्रेयस्कराय च ॥ १६॥

श्रेयसां पतये चैव ह्याश्रमाय नमो नमः ।
नमः श्रेयः स्वरूपाय श्रीकराय नमो नमः ॥ १७॥

शरण्याय वरेण्याय नमो भूयो नमो नमः ।
स्तोत्रं कृत्वा नमस्कृत्य देवदेवं विसर्जयेत् ॥ १८॥

इति रुद्रं समाख्यातां पूजां विष्णोर्महात्मनः ।
यः करोति महाभक्त्या स याति परमं पदम् ॥ १९॥

यः पठतेऽध्यायं विष्णुपूजाप्रकाशकम् ।
स विधूयेत पापानि याति विष्णोः परं पदम् ॥ २०॥

इति श्रीगारुडे महापुराणे पूर्वखण्डे प्रथमांशाख्ये आचारकाण्डे ।
श्रीधरा(विष्ण्व)र्चनविधिर्नाम त्रिंशोऽध्यायः ॥ ३०॥

गरुडपुराण । पूर्वखण्ड । अध्याय ३०/१३-१६॥

garuDapurANa . pUrvakhaNDa . adhyAya 30/13-16..

Proofread by PSA Easwaran

*Shri Dhararchanavidhi*

pdf was typeset on October 3, 2024

Please send corrections to *sanskrit@cheerful.com*